# समासविधिविमर्शः


## भोलानारायणरेग्मी (विद्यावारिधिः)

*सहप्राध्यापकः, श्रीविन्दुवासिनी–संस्कृत–विद्यापीठम्*

drbholanarayanregmi@gmail.com



### शोधसारः

*समसनमिति समासः, अनेकानां पदानामेकपदीभवनं वा । विधानमिति विधिः स चासौ विधिः समासविधिः तस्य विमर्शः (विचारः) समासविधिविमर्शः इत्यर्थः । समुपसर्गकादस्धातोर्भावेऽर्थे धञ्प्रत्ययेन सिद्धस्य समासशब्दस्य अनेकेऽर्थाः कृताः सन्ति । वैयाकरणास्तु–स्व–स्वार्थे पर्यवसितानां विभिन्नानां पदानां पदयोर्वा एकार्थे विशिष्टार्थ–बोधजनकीभूय पर्यवसानं समास इति स्वीकुर्वन्ति । अभिधानाश्रितलोपाभाववद् अन्यमध्यवर्तिविभतिmशून्यनामसमुदायत्वं समासत्वमित्यर्थः । शाकटायनादिपूर्ववैयाकरणैः समासस्य लक्षणानि समाश्रितान्यपि बहूनि पाणिन्यादित्रिमुनिव्याकरणानुयायिभिः, रामचन्द्र–वरदराज–भट्टोजी–नागेश–कौण्डभट्टप्रभृतिभिस्तत्तदाचार्यैः समासविषये पूर्वाचार्यमतान्यपि आत्मसात्कृत्य गतार्थीकृतानि । परकल्पिततडागोपजीवनवत् हानोपादानोपेक्षबुद्धिमत्तया समासस्य विस्तरो दृश्यते । तमेव विषयमुररीकृत्य तस्य किं लक्षणम् ? के च ते भेदाः ? कानि च तानि उदाहरणानि, इत्यमुं मुख्यविषयमादाय समासविचारक्रमे भूयांसि उदाहरणानि प्रत्युदाहरणानि च दत्वा सूत्रनिर्देशनपूर्वकं समासस्य या या मान्यता वर्तते तां तां मान्यतामपि हृदि निधाय शाब्दबोधजनकज्ञानविषयपदपदार्थसंबन्धरूपाया विशिष्टाया वृत्तेः, परार्थाऽभिधानरूपकृत्तद्धितसमासादिपञ्चवृत्तेश्चान्यतमत्वं समासे शक्तिसत्त्वात् प्रस्तावितोऽयमनुसन्धानात्मको विधिविमर्शो विशेषतो वर्ण–पद–वाक्यस्फोटात्मकेषु जातिव्यक्तिसखण्डाखण्डभेदेन अष्टविधेषु पदस्फोटे पदसमूहात्मके वाक्यस्फोटे वा शक्तिसञ्चारणे सहकारिकारणत्वात् सोऽयं विधिविमर्शः पञ्चवृत्तिषु प्राधान्यमाकलयन्ति तत्तदाचार्याः वैयाकरणाः, नैयायिकाः "सोमेन यजेत्" इति वाक्यप्रधानपक्षकाः मीमांसकाश्च । अस्योद्देश्यञ्च संक्षिप्यानेकानामर्थानां प्रकाशनमेव । अतः "यथा नाम तथा गुणाः" इति प्रसिद्धोक्तेः समासस्य शाब्दिकोऽर्थोऽपि सङ्क्षेपीकरणमेव । तच्च द्वयोर्बहूनां वैकीकरणं भवति ।*



### शब्दकुञ्जीः

एकार्थीभावः, पदविधिः, विग्रहवाक्यम्, समर्थः, समासः ।


## विषयपरिचयः

व्याकरणशास्त्रस्य सत्स्वपि अनेकेषु प्रयोजनेषु साक्षात्प्रयोजनं शब्दसाधुत्वप्रतिपादनमेव । शब्दसाधुत्वप्रतिपादकं व्याकरणशास्त्रं महेश्वरे समुद्रवद् विशालम् आसीत् । ततोऽर्धकुम्भपरिमितं वृहस्पतौ आगतं तद्भागभागात् शतक्रतौ गतं पाणिनौ च कुशाग्रविन्दुपरिमितं समागतम् । अत एव शब्दानां साधुत्वमात्रं परिचायकमिदं व्याकरणम्, तेषां प्रतिपादनपरम्परा बहुधा बहुभिः पूर्वाचार्यैः प्रतिपादिता सत्यपि भगवता पाणिनिना प्रतिपादिता

रीतिरतिवैज्ञानिकी वर्तते। आरोहावरोहक्रमाभ्यां तदनुयायिभिराचार्यैश्च प्रतिपादितम्, परन्तु भट्टोजिदीक्षितस्यावरोहक्रमः प्रशस्तः । तस्मिन्नपि वैयाकरणसिद्वान्तकौमुदी, अतीवोपयोगिनी । तत्र संज्ञासन्धिषड्लिङ्गाव्ययस्त्रीलिङ्गकारकसमासतद्धिततिङन्तकृदन्तोणादिप्रकरणानां यथाक्रमं व्याख्यानं कृतमस्ति । शब्दानां बहुभेदवत्वं विद्यते। यथाऽत्र– समास्ताः, व्यस्ताः, समस्तव्यस्ताश्च शब्दाः सन्ति।

अनेकपदानि मिलित्वा एकपदीभवनं समासः । पदयोः पदानां वा विधिः स एव पुनः समासादिविग्रहवाक्यार्थाऽभिधाने यः शक्तः स समर्थः । सोऽपि समसनं समास इत्यन्वर्थविवक्षयैकार्थे पर्यवस्यति । यथा=राज्ञः पुरुषः राजपुरुषः । पीतञ्च तदम्बरं पीताम्बरमित्यादिः । समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्" (कौण्डभट्टः, सन् १९८५, कारिका ३१) इति। वैयाकरणानाम्मते कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयो भवन्ति । तेषु समासवृत्तिर्मध्यस्थत्वाद्देहलीदीपकन्यायेन पञ्चानां वृत्तीनां द्योतिका वर्तते । समासस्य भेदा बहुधा प्रदश्र्यन्ते । यथा– प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः । प्रायेणाऽन्यपदार्थप्रधानो बहुव्रीहिः। संख्यापूर्वो द्विगुः। तत्पुरुषः समानाधिकरणः कर्मधारयः। प्रायेण उभयपदार्थप्रधानो द्वन्द्वः। तद्भेदाश्च यथा–

षोढा समासः संक्षेपादष्टाविंशतिधा पुनः।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा॥ (आचार्यः, २०५६, पृ. ९०)
सुपां सुपा तिङां नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः॥ (कौण्डभट्टः, सन् १९८५, कारिका २८)

सुपां सुपा = राजपुरुषः । सुपां तिङा=पर्य्यभूषयत् । सुपां नाम्ना= कुम्भकारः । सुपां धातुना=कटप्रूः । तिङां सुबन्तेन = जहिस्तम्भः। समासस्य षड्भेदाः "सह सुपा"(पाणिनिः,सन् १९९२ सू. २।१।४) इति सूत्रभाष्ये योगविभागेन व्युत्पादिताः सन्ति । (पतञ्जलिः, सन् १९८७, पृ. ११२) शब्दकौस्तुभादौ स्पष्टतया व्याख्याताश्च सन्ति। एतद्विषये समासजिज्ञासूनां कृते प्रवेशार्हतासोपानमत्र प्रस्तूयते।

समस्याकथनम्

यद्यपि शब्दसाधुत्वप्रतिपादकस्य व्याकरणशास्त्रस्य प्रमुखविषयस्य पदसमूहात्मकरूपस्य समासस्य विषये बहुधा बहुभिर्विद्वद्भिः चिन्तनम् कृतमस्ति । तथापि व्याकरणशास्त्रे विकीर्णा नैकत्रीकृता मतभेदाश्च प्रतीयन्ते । एतेषामैतिहासिकरूपेणाऽचार्याणां सैद्धान्तिकसमासविधिविमर्शो परिशीलितो न दरीदृश्यते।

एतस्मादस्मिन् विषये एताः समस्या मूलभूता वर्तन्तेः–

१. समासशब्दस्य व्युत्पत्तिः का ?

२.समासस्य लक्षणानि कानि ?

३. तस्य भेदाश्च के ?

## उद्देश्यकथनम्

समासस्य व्युत्पत्तिं विधाय तस्य लक्षणानि उदाहरणानि चादाय तस्य भेदाः के के सन्ति तेषां बहुशः उदाहरणानि प्रत्युदाहरणानि च प्रदश्र्य तत्तात्पर्यप्रकाशनपूर्वकं निष्कर्षणमेव प्रस्तुतस्य शोधलेखस्योद्देश्यं वरीवर्ति । एवमेव वैयाकरणनिकाये "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते" (भट्टः,वि.सं.२०३९,पृ.३३७) इति नियमप्रधानात् अनेकार्थबोधकानामनेकपदानमेकपदीकरणत्वेन एकार्थीभावतया अनायासेन बोधजनक –समासविषयमादाय

उदाहरणप्रत्युदाहरणतया सरलशैल्या जनमानसबोधनमेवास्योद्देश्यम् । तथापीमानि मूलभूतानि उद्देश्यानि परिगण्यन्ते । तद्यथा–

१. समासस्य व्युत्पत्तिप्रतिपादनम्

२. लक्षणानां विश्लेषणम्

३. नैकविधोदाहरणप्रत्युदाहरणमुखेन तद्भेदविमर्शणम् ।

## पूर्वकार्यस्य समीक्षणम्

ज्ञानस्यादिस्रोतोभूतस्य वेदस्य षडङ्गेषु व्याकरणशास्त्रस्य महत्वपूर्णं स्थानं विद्यते । प्रायः सर्वाण्यपि शास्त्राणि मुखमिव मुख्यभूते व्याकरणशास्त्रे समाश्रितानि सन्ति । सकलशास्त्राणामाधारभूतस्य तस्य व्याख्यानक्रमौ द्वौ आरोहोऽवरोहश्च । भगवतो महेश्वरात् प्राप्तायाः पाणिनिपरम्पराया अद्यतने सुप्रसिद्धत्वात् त्रिमुनि (पाणिनि, कात्यायन, पतञ्जलि) व्याकरणंपाणिनिव्याकरणं वा सूक्ष्मेक्षिकया सूत्रात्मकं वैज्ञानिकं दिग्दिगन्तं प्रख्यातं विद्यते । अवरोहक्रमानुसारि व्याख्यानं संज्ञा–सन्धि–षड्लिङगाव्यय–स्त्रीप्रत्यय–कारक–समास–तद्धित–भ्वादिनवगणान्त–कृदन्तान्त–उणादि–वैदिक–स्वर–फिट्सूत्र– लिङ्गानुशासनरूपेणातिप्रसिद्धत्वेदानीं तथैव पठ्यते पाठ्यते च । तत्र मध्यगतस्य समासप्रकरणस्य महत्वं भूरि वर्तते । व्याकरणशास्त्रस्य समासविषयमादाय पौरस्त्यैराचार्यैर्लिखितेषु पुस्तकेषु प्राप्तस्य विषयस्य चिन्तनं तत्र तत्र कृतं लभ्यते । तथा सत्यपि समासविधिविषयमाश्रित्य समग्रतया चैकीकृत्य तत्तन्मतानामाकरञ्चान्विष्य न तथा विमर्शो लभ्यते यथा अपेक्षते । जातेऽपि चिन्तने पृथक्त्वेन पौरस्त्यग्रन्थान् समादृत्य समासविधिविषयकं समग्रतया गभीरं चिन्तनं न लभ्यते । किञ्चिदेव विकीर्णतया यत्र तत्र प्राप्यते ।

तदेवाऽस्मिन् लघुशोधे स्थालीपुलाकन्यायेन कालक्रमानुसारेण च प्रस्तूयते –

चिरञ्जीवीआचार्यमहोदयेनसमासपर्यालोचनम् (वै.२०६६) इत्याख्ये शीर्षके आचार्यद्वितीयकक्षायाः शोधपत्रे समासस्य पर्यालोचनं विहितमस्ति । तत्र समासस्य सलक्षणं सावयवं सभेदञ्च व्याख्यानं नैव कृतं यथाऽन्वेश्यम् ।

इत्थञ्च "राधाकृष्णसुवेदी" महोदयेन 'श्रीमद्भागवतस्थवेदस्तुतेः समासपरकमध्ययनम्' इति शीर्षकाख्ये (वै. २०७८) विषये वेदस्तुतौ प्रयुक्तानां समासपरकाणामेव शब्दानां चिन्तनं नान्येषां पर्याप्तं वर्तते ।

रत्नलालकण्डेलमहाभागेनाऽपि आचार्यद्वितीयखण्डस्यानुसन्धाने "भूषणसार–परमलघुमञ्जूषयोः समासशक्तिप्रकरणस्य तुलनात्मकमध्ययनम्" (वैक्रमाब्दे २०७७) इत्याख्ये शीर्षके समासशक्तिविषयकं चिन्तनं तोलनपर्यालोचनरूपेण कौण्ड भट्ट–नागेश भट्टयोर्मतभेदाः समासशत्तिविषये समधिगता भिन्नैव विद्यते ।

एतावता अनेकैर्विद्वद्भिः साक्षात् परम्परया वा कृतस्य समासस्य चिन्तनं विकीर्णमेव दृश्यते । किञ्च तथा कृतानि तानि तानि चिन्तनानि तत्तद्विषयिणीमैतिहासिकीं नवाधुनिकीं स्थितिमादाय नैव प्रवृत्तानि अतोऽत्र सम्पादिते च लघुशोधलेखे समासविधिविषयगतं व्याकरणशास्त्रस्य मुख्यविषयं पदयोः पदानां वा एकीभवनरूपात्मके वाक्यस्फोटघटके एकार्थीभावसामर्थे उक्त सम्बद्धे विमर्श अत्र प्रस्तुतो विद्यते ।

## अध्ययनस्यौचित्यम्

प्रस्तुते च लघ्वनुसन्धाने पदसम्बन्धात्मकं समासविषयकं सामथ्र्यमादाय सलक्षणं सावयवं सोदाहरणञ्च विश्लेषणमावश्यकमस्ति । तदनुरूपमेवास्याध्ययनस्यौचित्यम् लक्षीकृत्य कस्तावत्समासः किञ्च तल्लक्षणं के च ते भेदा

एतान् विषयान् आधारीकृत्य समन्वेषणपुरस्सरं प्रतिपादनियो विषय एव प्रतिपादितो विद्यते खलु नाऽत्र वैपरीत्यमनौचित्यम्।

## अध्ययनस्य क्षेत्रं सीमा च

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चसु वृत्तिषु अध्ययनेऽस्मिन् समासवृत्तिविषये विद्यमानानि लक्षणोदाहरणप्रत्युदाहरणनि क्रोडीकृत्य समासविधिं परिचाय्य तदर्थञ्च पाणिन्यष्टकस्य आरोहावरोहक्रमेण व्याख्यातानां ग्रन्थानां विवेचनपुरस्सरं तदन्तः प्रवेशनमेवास्य लघुशोधस्य क्षेत्रं सीमा च विद्यते।

## अध्ययनविधिः

अध्ययनमिदं वैयाकरणानां राद्धान्ते प्रतिपादितानां पञ्चवृत्तीनां समासवृत्तिविषयमङ्गीकृत्य तल्लक्षणभेदानां उदाहरणानि प्रत्युदाहरणानि च दत्वा निगमनात्मकविधिरवलम्बितो विद्यते । अध्ययने तथ्यसङ्कलने च पुस्तकालयीयविधिरवलम्बितः। विषयविस्तारक्रमे सान्दर्भग्रन्थानां स्रोतःप्रदानादौ च ए.पी.ए. रीतिरुररीकृता।

## सैद्धान्तिकाधारः

पदानां पदयोर्वा एकपदीभवनमेव समासः कथ्यते । व्याकरणं खलु अर्धमात्रालाघवेन पुत्रोत्सवसदृशं लघ्वाधायकं शास्त्रं वर्तते। अत्र च शोधलेखे समासविधिविषयकं आकरशास्त्रं पातञ्जलमाहाभाष्यम्। अवरोहक्रमे च रामचन्द्राचार्यप्रणीता प्रकृयाकौमुदी, अपि च भट्टोजिदिक्षितस्य वैयाकरणसिद्धान्तकौमुदी वरदराजाचार्येण प्रणीता मध्य–लघुसिद्धान्तकौमुदीप्रभृतयः ग्रन्थाः मुख्याधाराः सन्ति। एवञ्च समासविषयाधाराः समासकलिका–समासप्रकाशादयः विवरणग्रन्थाः समासविषये पृथक्–पृथक् सिद्धान्तानाधारीकृत्य प्रकाशिताः सैद्धान्तिकाधाराश्च विलसन्ति।

## विषयारम्भः

सामान्यरूपेण समासः षड्विधः । अव्ययीभावतत्पुरुषकर्मधारयद्विगुबहुव्रीहिद्वन्द्वभेदात् । समासशब्दस्य निष्पत्तिश्च यथा– समसनं समासः, संपूर्वकाद् अस्धातोर्भावेऽर्थे घञ्प्रत्ययेन समासशब्दः सिद्ध्यति।

सङ्क्षेप इति मनुः। समर्थनम् इति हलायुधः। एकपद्यसम्पादनम् इति हेमचन्द्रः। पदयोःपदाना–
मेकीकरणम् इति संक्षिप्तसारव्याकरणम् । भिन्नान्येकार्थद्वयादिसंख्याव्ययादीनां च– ह –य– ष– ग– वा–इति मुग्धबोधव्याकरणम्। विभिन्नैराचार्यैः, इत्याद्यर्थाः कृताः सन्ति। (बहादुरः, सन् २००२, पृ. २७४) इमान्यपि चतुर्णां मुख्यसमासानां लक्षणनि यथा–

*चकारबहुलो द्वन्द्वः स चाऽसौ कर्मधारयः।*
*यस्य येन बहुव्रीहिश्शेषस्तत्पुरुषःस्मृतः॥ (आचार्यः, सन् १९९१, पृ.१३३)*

**अयम्भावः** – यत्र चकारयोश्चकाराणां वा बाहुल्येन प्रयोगो भवति तस्मिन् स्थले द्वन्द्वसमासः सिद्धयति यथा– धवश्च खदिरश्च धवखदिरौ। अत्र धव सु खदिर सु इत्यलौकिकविग्रहवाक्ये एकार्थीभावरूपं सामथ्र्यमादाय "चाऽर्थे द्वन्द्वः" पा.सु. २।२।२९ इति सूत्रेण समासः सम्पद्यते। चकाराणां रामश्च कृष्णश्च श्यामश्च इति लौकिकविग्रहवाक्यम्, राम सु कृष्ण सु श्याम सु एतादृशे स्वपदविग्रहे समासात् प्राक्तनभाविन्यलौकिके च विग्रहवाक्ये समासः। यत्र स, चौ, असा इत्यादिशब्दानां प्रयोगो भवति तत्र कर्मधारयसमासो बोद्धव्यः । तथाचोदाहरणानि– निलश्चासौ कण्ठश्च इति

लौकिकविग्रहो नील सु कण्ठ सु इत्यलौकिकविग्रहवाक्ये "विशेषणं विशेष्येण बहुलम्" पा.सू. २।१।५७ समासे सति 'नीलकण्ठः' इति रूपस्य सिद्धिर्भवति । अपरञ्च– नीलञ्च तदुत्पलं नील सु उत्पल सु इत्यत्र समासेन "नीलोत्पलः" इत्यस्य सिद्धिर्भवति । इत्यमेव शीतञ्च तदुष्णं च "शीतोष्णम्" पुराणश्च स मीमांसकः "पुराणमीमांसकः" । यत्र च यस्य येन यस्मै यस्माद्यस्मिन्, प्रभृत्तीनां शब्दसमूहानां स्वरुपं क्रमेण लौकिकविग्रहवाक्ये संस्थाप्यालौकिकविग्रहं विधाय समासो भवति स बहिव्रीहि कथ्यते । तद्यथा–प्रथमान्तार्थः कर्मधारयः । द्वितीयार्थे "कृतप्रणामः" कृतः प्रमाणोऽयम् कृत सु प्रणाम सु इत्यत्र "अनेकमन्यपदार्थे" २।२।२४ इति सूत्रेण समासः । "ऊढरथः" ऊढो रथो येन स ऊढ सु रथ सु इति विग्रहे समासः । "चित्रगुः" चित्राः गावो यस्य चित्र जस् गो जस् इत्यलौकिकविग्रहे उक्त सूत्रेण समासः । शेष अन्यैर्लक्षणैर्युक्तः तत्पुरुषो ज्ञेय इत्यर्थ । तद्यथा– "तत्पुरुषः" इति लौकिकविग्रहः तद् अम् पुरुषः सु इत्यलौकिकविग्रह एव समासः । एवम्प्रकारेण तेन, तस्मै, तस्माद्, तस्मिन्निति च सर्वविभक्त्यन्तस्तत्पुरुषो भवति ।

स च यत्र प्रथमाद्याः सुबादयो विभक्तयः परपदेन समस्यन्ते स तत्पुरुषः । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषो भवति । अष्टौ भेदास्तत्पुरुषस्य भवन्ति । प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्पूर्वकतत्पुरुषश्चेति (दीक्षितः, सन् १९९५, पृ.२००) ।

**प्रथमातत्पुरुषो यथा**– पूर्वं कायस्य पूर्वकायः । (पूर्वापराधोत्तरमेकवेशिनैकाधिकरणे । २।२।१ । इति सूत्रेण समासः) । अपरं कायस्य अपरकायः । अधरकायः । उत्तरकायः । अद्र्धं पिप्पल्या अद्र्र्धपिप्पली अर्धं नपुसकम् । २।२।२ इति सूत्रेण समासः) । अद्र्धकोशातकी । द्वितीयं भिक्षाया द्वितीयभिक्षा । (द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । २।२।३ इति सूत्रेण समासः) । तृतीयं भिक्षाया भिक्षातृतीयम् । चतूर्थं भिक्षाया । भिक्षाचतूर्थम् । तूर्यं भिक्षाया– भिक्षातूर्यम् । प्राप्तो जीवीकाम्–प्राप्तजीविकः । (प्राप्तापन्ने च द्वितीयया । २।२।४ इति सूत्रेण समासः) । आपत्रो जीविकामापत्रजीविकः । मासो जातस्य मासजातः । कालाः परिमाणिना । २।२।५ इति सूत्रेण समासः । द्व्यहजातः । त्र्यहजातः ॥ द्वितीयातत्पुरुषो यथा–कष्टं श्रितः कष्टश्रितः । (द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । २।१।२४ इति सूत्रेण समासः) । नरकश्रितः । कान्तारातीतः । भूमिपतितः । ग्रामगतः । शरात्यस्तः । तरङ्गात्यस्तः । सुखप्राप्तः । दुःखापत्रः ॥ खट्वामारूढः–खट्वारूढः (खट्वा क्षेपे । २।१।२६ इति सूत्रेण समासः) । खट्वाप्लुतल्ः । सामिभुक्तम् । सामिपीतम् । मासं प्रमितः – मासप्रमितः । मुहूर्तं सुखम् –मुहूर्तसुखम् । कालाः । २।१।२८ इति सूत्रेण समासः) । वर्षं भोग्यो वर्षभोग्यः ।

**तृतीयातत्पुरुषो यथा**–शङ्कुलया खण्डः–शङ्कुलाखण्डः । (तृतीया तत्कृतार्थेन गुणवचनेन । २।१।३० इति सूत्रेण समासः) । धान्येनार्थो– धान्यार्थः । मासेन पूर्वो मासपूर्वः । ( पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । २।१।३१ इति सूत्रेण समासः) । संवत्सरपूर्वः । मातृसदृशः । पितृसदृशः । मात्रा समः मातृसमः–माषोनं कार्षापणम् । असिकलहः । वाक्कलहः ॥ हरिणा त्रातः–हरित्रातः । ( कर्तृकरणे कृता बहुलम् । २।१।३२ २।१।३१ इति सूत्रेण समासः) । अहिहतः। नखनिर्भित्रः । परशुछित्रः । वातच्छेद्यं तृणम् । (कृत्यैरधिकार्थवचने । २।१।३३ इति सूत्रेण समासः) । काकपेया नदी । श्वलेह्यः

कूपः । दध्ना उपसिक्त ओदनः–दध्योदनः । (अन्नेन व्यञ्जनम् । इति समासः । क्षीरौदनः, गुडेन मिश्रा धाना गुडधानाः । (भक्ष्येण मिश्रीकरणम् । २।१।३५ इति सूत्रेण समासः) । गुडपृथुकाः ॥

**चतुर्थीतत्पुरुषो** यथा–यूपाय दारु यूपदारु । (चतुर्थीतदर्थार्थवलिहितसुखरक्षितैः २ ।१।३६ इति सूत्रेण समासः) । कुण्डलाय हिरण्यं कुण्डलहिरण्यम् । द्विजायायं द्विजार्थः सूपः । ब्राह्मणार्थं पयः । कुबेराय बलिः कुबेरबलिः । महाराजबलिः । गोभ्यो हितं गोहितम् । अश्वहितम् । गोरक्षितम् । अश्वरक्षितम् ॥

**पञ्चमीतत्पुरुषो यथा**– वृकेभ्यो भयं वृकभयम्। (पञ्चमी भयेन। २।१।३७ इति सूत्रेण समासः)। चौरभयम्। चक्रमुक्तः। स्वर्गपतितः। तरङ्गापत्रस्तः। स्तोकान्मुक्तः। (स्तोकान्तिकदूरार्थकृच्छाणि क्तेन। २।१।३९ इति सूत्रेण समासः)। अन्तिकादागतः। अभ्यासादागतः। दूरादागतः। विप्रकृष्टादागतः। कृच्छादागतः। कृच्छान्मुक्तः। कृच्छाल्लब्धः॥

**षष्ठीतत्पुरुषो यथा**– राज्ञः पुरुषो राजपुरुषः। (षष्ठी। २।२।८ इति सूत्रेण समासः)। ब्राह्मणकम्बलः। ब्रहणस्य याजको ब्राह्मणयाजकः। (याजकादिभिश्च। २।२।९ इति सूत्रेण समासः)। राजपरिचारकः। चन्दनगन्धः। (तत्स्थैस्च गुणैः षष्ठी समस्यते। इति वार्तिकेन समासः )। फलरसः। सर्वेषां स्वेततरः सर्वस्वेतः। (गुणात्तरेण तरलोपश्चेति वक्तव्यम्। इति वार्तिकेन समासः)। सर्वमहान्। उद्दालकपुष्पभञ्जिका। (नित्यं कीॖरडाजीविकयोः। २।२।१७ इति सूत्रेण समासः)। दन्तलेखकः। नखलेखकः॥

**सप्तमीतत्पुरुषो यथा**– अक्षेषु शौण्डोऽक्षशौण्डः। ( सप्तमी शौण्डैः। २।१।४० इति सूत्रेण समासः)। अक्षधूर्तः। सांकाश्ये सिद्धः सांकाश्यसिद्धः। (सिद्धशुष्कपक्वबन्धैश्च। २।१।४१ इति सूत्रेण समासः)। आतपशुष्कः। चक्रबन्धः। तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः। (ध्वाङ्क्षेण क्षेपे। २।१।४२ इति सूत्रेण समासः)। देयमृणम्। (कृत्यैर्ऋणे। २।१।४३ इति सूत्रेण समासः)। अरण्येतिलकाः। (संज्ञायाम्। २।१।४४ इति सूत्रेण समासः)। वनेकसेरुकाः। पूर्वाह्णे कृतं पूर्वाह्णकृतम्। (क्तेना– होरात्रावयवाः। २।१।४५ इति सूत्रेण समासः)। अपरात्रकृतम्। तत्रभुक्तम्। (तत्र। २।१।४६ इति सूत्रेण समासः)। तत्रकृतम्। तत्रपीतम्। उदकेविशीर्णम्। (क्षेपे। २।६।४७ इति सूत्रेण समासः)। प्रवाहेमूत्रितम्। भस्मनिहुतम्। पात्रेसमिताः। (पात्रे समितादयश्च। २।१।४८ इति सूत्रेण समासः)। कूपमण्डूकः। गेहेशूरः। गोष्ठेपण्डितः॥

**नञ्तत्पुरुषो यथा**– न ब्राह्मणः अब्राह्मणः। (नञ्। २।२।६ इति सूत्रेण समासः)। अवृषलः।

अवृषभः। अनश्वः। असुरापः असोमपः। न भ्राजत इति नभ्राट्। (नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। ६।३।७६ इति सूत्रेण समासः)। न पातीति नपात्। न वेत्तीति नवेदाः। सत्सु साधवः सत्याः न सत्या असत्याः न असत्या नासत्याः। न मुञ्चतीति नमुचिः। नास्य कुलमस्तीति नकुलः। नाऽस्य खमस्तीति नखम्। न स्त्री पुमान् नपुंसकम्। न क्षरते क्षीयते वा नक्षत्रम्। न क्रामतीति नक्रः। नास्मित्रकमिति नाकम्। न गच्छन्तीति नगाः पर्वताः। अगा वृक्षाः॥ कर्मधारयसमासः सप्तधा यथा– विशेषणपूर्वपदविशेष्यविशेषणोभयपदोपमान पूर्वपदोपमानोत्तरपदसम्भावनावधारणपूर्वपदभेदात्। विशेषणपूर्वपदो यथा– नीलञ्च तदुत्पलं नीलोत्पलम। (विशेषणं विशेष्येण बहुलम्। २।१।४७ इति सूत्रेण समासः)। नीले च ते उत्पले नीलोत्पले तानि उत्पलानि नीलोत्पलानि। कृष्णश्चासौ सर्पः कृष्णौ च तौ सर्पौ कृष्णसर्पौ। रक्ता चासौ लता च रक्ते च ते लते, रक्तलते। रक्ताश्च ता लताः, रक्तलताः। रक्तोत्पलम्। नीलघटः। कुटिललता। पूर्वपुरुषः। (पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीराश्च। २।१।५८ इति सूत्रेण समासः)। अपरपूरुषः।
प्रथमपुरुषः। चरमपुरुषः। जघन्यपुरुषः। समानपुरुषः। मध्यपुरुषः। मध्यमपुरुषः। वीरपुरुषः।

विशेषणोत्तरपदो यथा– पापश्चासौ नापितः पापनापितः। (पापाणके कुत्सनैः। २।१।५४ इति सूत्रेण समासः)। आणककुलालः। वैयाकरणखसूचिः। (कुत्सितानि कुत्सनैः। २।१।५३ इति सूत्रेण समासः)। निष्प्रतिभ इत्यर्थः। याज्ञिककितवः। अयाज्ययाजनतृष्णपर इत्यर्थः। मीमांसकदुर्दुरूढः। नास्तिक इत्यर्थः॥ अश्रेणयः श्रेणयः कृताः श्रेणीकृताः। (श्रेण्यादयः कृतादिभि। २।१।५९ इति सूत्रेण समासः)। पूगकृताः। गौर्वृन्दारक इव गोवृन्दारकः। – वृन्दारकनागकुञ्जरैः पूज्यमानम्। अस्ववृन्दारकः। गोनागः। अश्वनागः। गोकुंजरः। अश्वकुंजरः। कतरकठः। ( कतरकतमौ जातिपरिप्रश्ने। २।१।६३ इति सूत्रेण समासः)। कतरकलापः। कतमकठः। कतमकालापः। किंराजा। ( किं

क्षेपे । २।१।६४ इति सूत्रेण समासः । किंसखा । इभपोटा । ( पोटायूवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । २।१।६५ इति सूत्रेण समासः) । इभयुवतिः । अग्निस्तोकः । उद्श्वित्कतिपयम् । गोगृष्टिः । गोधेनुः । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः । कठधूर्तः । गोप्रकाण्डम् । प्रशंसावचनैश्च । २।१।६६ इति सूत्रेण समासः) । अश्वप्रकाण्डम् । गोमतल्लिका । गोमचर्चिका । अश्वमचर्चिका । युवा खलतिः–युवखलतिः । युवतिः खलती – युवखलतिः । (युवा खलतिपलितबलिनजरतीभिः । २।१।६७ इति सूत्रेण समासः) । यूवतिः पलिता–युवपलिता । भोज्योष्णम् । भोज्यलवणम् । (कुत्यतुल्याख्या अजात्ये । २।१।६८ इति सूत्रेण समासः) । तुल्यश्वेतः । तुल्यमहान् । सदृशश्वेतः । कृष्णसारङ्गः । ( वर्णो वर्णेन । २।१।६९ इति सूत्रेण समासः) । लोहितसारङ्गः । कृष्णशबलः । कडारजैमिनिः । ( कडाराः कर्मधारयः इति सूत्रेण समासः । जैमिनिकडारः । गोगर्भिणी । (चतुष्पादो गर्भिण्यः । २।१।७१ इति सूत्रेण समासः) । अजागर्भिणी । मयूरव्यंसकः । ( मयूरव्यंसकादयश्च । २।१।७२ इति सूत्रेण समासः) । छात्रव्यंसकः । ईषत्पिङ्गलः । ईषत्कडारः । कुत्सितः पुरुषः–कुपुरुषः । (कुगतिप्रादय । २।२।१८ इति सूत्रेण समासः) । विशेषणोभयपदो यथा–शीतं त तत् उष्णं च शीतोष्णम् । ( विशेषणं विशेष्येण बहलम् । २।१।५७ इति सूत्रेण समासः) । मन्दोष्णम् । पूर्वं स्नातः पश्चादनुलिप्तः–स्नातानुलिप्तः । (पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । २।१।४९ इति सूत्रेण समासः) । कृष्णसमीकृतम् । एकभीक्षा । एकशाटी । सर्वदेवाः । सर्वमनुष्याः । जरद्धस्ती । जरत्रैयायिकः । पुराणमीमांसकाः । पुराणात्रम् । नवपाठकाः । नवात्रम् । केवलवैयाकरणः । केवलात्रम् । पूर्वेषुकामशमी । पञ्चाम्राः । सतर्षयः । कृतं च तदकृतं च कृताकृतम् । भुक्ताभुक्तम् । पीतापीतम् । उदितानुदितम् । उपमानपूर्वपदो यथा –शस्त्रीव श्यामा शस्त्रीश्यामा । (उपमानानि सामान्यवचनैः । २।१।५५ इति सूत्रेण समासः) । हंसगद्गदा । शङ्ख इव पाण्डुरः– शङ्खपाण्डुरः । मेघ इव श्यामः–मेघश्यामः । चन्द्रवन्मुखं–चन्द्रमुखम् । उपमानोत्तरपदो यथा–पुरुषोऽयं व्याघ्र इव– पुरुषव्याघ्रः । (उपमितं व्याघ्रादिभिः । २।१।५६ इति सूत्रेण समासः) । पुरुषसिंहः । पुरुषकुञ्जरः । नरसिंहः । पुरुषर्षभः ॥ सम्भावनापूर्वपदो यथा–गुण इति बुद्धिः–गुणबुद्धिः । ( विशेषणं विशेष्येण बहुलम् । २।१।५७ इति सूत्रेण समासः) । नय इति गुणः– नयगुणः ॥ अवधारणपूर्वपदो यथा –गुण एव धनं–गुणधनम् । यश एव धनं–यशोधनम् । सुकृतमेव बन्धुः– सुकृतबन्धुः । विद्यैव धनं–विद्याधनम् ॥ शाकप्रधानः पार्थिवः– शाकपार्थिकः । (शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसङ्ख्यानम् । इति वार्तिकेन समासः) । कुतपसौश्रूतः । सङ्ख्यापूर्वः समासो द्विगुर्ज्ञेयः । इमौ द्विगुतत्पुरुषविशेषौ विज्ञेयौ ॥ द्विगुर्द्विधा । एकवद्भाविकोऽनैकवद्भाविकश्च । तत्रैकवद्भावि यथा—त्रीणि श्रृङ्गाणि समाहृतानि त्रिश्रृङ्गम् । ( तद्धितार्थोत्तरपदसमाहारे च । २।१।५१ इति सूत्रेण समासः) । दशपूली । दशकुमारि ॥ अनेकवद्भाविको यथा– पञ्चपूली । (अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः । इति वार्तिकेन समासः) । चतस्रो दिशश्चतुर्दिशः । ( दिक्सङ्ख्ये संज्ञायाम् । २।१।५० इति सूत्रेण समासः) । त्रयो लोकास्त्रिलोकाः ॥

यत्र द्वे पदे बहूनि वा पदानि अन्यपदार्थे वर्तमाने वर्तमानानि च समस्येते समस्यन्ते च स समासो बहुव्रीहिः । प्रथमार्थमेकं वर्जयित्वा सर्वेष्वन्येषु विभक्त्यर्थेषु षट्सु बहुव्रीहिर्विधीयते । सप्ताधा बहुव्रीहिः, यथा– द्विपदबहुपदसङ्ख्योत्तरपदोभयपदसहपूर्वपदव्यतिहारलक्षणदिगन्तरलक्षणभेदात् । द्विपदो यथा–प्राप्तमुदकं यं सः– प्रप्तोदको ग्रामः । (अनेकमन्यपदार्थे । २।२।२४ इति सूत्रेण समासः) । आरूढो वानरो यं सः– आरूढवानरो वृक्षः । निर्जितः कामो यं सः– निर्जितकाम ईश्वरः । कृतप्रणामः । दत्तभोजनः । उपनीतं भोजनं यस्मै सः– उपनीतभोजनः । उपहृतः पशुर्यस्मै सः–उपहृतपशू रुद्रः । उद्धृतं धनं यस्मात् तत्–उद्धृतधनम् । निष्कासितो जनो यस्मात् सः– निष्कासितजनो ग्रामः । चित्राः गावो यस्य सः– चित्रगुर्देवदत्तः । पीतमम्बरं यस्य सः– पीताम्बरो हरिः । पुष्पिता द्रुमा

यस्मिन्सः– पुष्पितद्रुमः । वीराः पुरुषा यस्मिन्सः–वीरपुरुषको ग्रामः। सुलभाजिनवासो हरः । मसटाजटिलासभित्तिः । सङ्ख्योत्तरपदो यथा–दशानां समीपे ये सन्ति ते–उपदशाः , पुरुषाः । उपविंशाः । आसन्नदशाः । आसन्नविंशाः । (सङ्ख्ययाव्ययासन्नदूराधिकसङ्ख्याः सङ्ख्येये ।२।२।२५ इति सूत्रेण समासः) अदुरदशाः । अदुरविंशाः । अधिकदशा । अधिकविंशाः । सङ्ख्योभयपदो यथा–द्वौ वा त्रयो वा द्वित्राः । त्रयो वा चत्वारो वा त्रिचतुराः । द्विदशाः । त्रिदशाः । सहपूर्वपदो यथा–पुत्रेण सह आगतः– सपुत्रः । (तेन सहेति तुल्ययोगे । २।२।२८ इति सूत्रेण समासः) । सच्छात्रः । सकर्मकरः । सलोमकः । सपक्षकः ॥ व्यतीहारलक्षणो यथा–केशेषु केशेषु गृहीत्त्वेदं युद्ध वृत्तं–केशाकेशि । (तत्र तेनदमिति सरूपे । २।२।२७ इति सूत्रेण समासः) । कचाकचि । दण्डैश्च दण्डैश्च प्रहृत्येदं युद्वं वृत्तं –दण्डादण्डि । नखानखि । मुष्टीमुष्टि । मुसलामुसलि । दिगन्तरलक्षणो यथा–दक्षिणस्याः पूर्वस्याश्च दिशयोर्यदन्तरालं दक्षिणपूर्वा । (दिङ्नामान्यन्तराले । २।२।२६ इति सूत्रेण समासः) । उत्तरपूर्वा । पूर्वोत्तरा । उत्तरपश्चिमा । पश्चिमदक्षिणा ॥ यत्र समासे द्वयोर्नाम्नोर्बहूनां वापि नाम्नां यःसमासःस द्वन्द्वसमासः । द्वन्द्वश्चतुर्द्धा–समुच्चयान्वाचयेतरेतरयोगसमाहारभेदात् तत्र परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । समुच्चयो यथा–ईश्वरं गुरुं च भजस्व । देवदत्तः पचति फुत्कारं करोति इत्यत्र अन्यतरानुषङ्गिकत्वेऽन्वाचयः ।

अन्वाचयो यथा–भिक्षामट गां चानय । अनयोः समुञ्चयान्वाचययोरसामथ्यात्र भवति । समर्थः

पदविधिरित्यधिकारात् । मिलितानामन्वय इतरेतरयोगः ॥ इतरेतरयोगो यथा – देवदत्तश्च यज्ञदत्तश्च–देवदत्तयज्ञदत्तौ । ( चार्थे द्वन्द्व । २।२।२९ इति सूत्रेण समासः) । धवश्च खदिरश्च धवखदिरौ । धवश्च खदिरश्च पलाशश्च–धवखदिरपलाशाः । ब्राह्मणश्च क्षत्रियश्च वैश्यश्च शूद्रश्च– ब्राह्मणक्षत्रिय– वैश्यशूद्राः । समूहः समाहारः । समाहारो यथा–पाणी च पादौ च इति पाणिपादम् । ( द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् । २।४।२ इति सूत्रेण समासः) । वाग्दृषदम् । छत्रोपानहम् । प्लक्षन्यग्रोधम् । कठकालापम् । कठकौथुमम् । अर्काश्वमेधम् । पदकक्रमकम् । गङ्गाशोणम् । कुरुकुरुक्षेत्रम् मथुरापाटलिपुत्रम् । अहिनकुलम् । तक्षायस्कारम् । शिरोग्रीवम् । मार्दङ्गिकपाणविकम् । हस्त्यश्वम् । युकालिक्षम् । वीणावादकपरिवादकम् । बदरामलकम् । धवाश्वकर्णम् । कुशकाशम् । तिलमाषम् । रुरूपृषतम् । हंसचक्रवाकम् । दधिघृतम् । सुखदुःखम् । रथिकाश्वारोहम् । रथिकपादातम् । भेरीमृदङ्गम् । करतालम् ॥

यस्य समासस्य पूर्वमेवलक्षणं कृतं सोऽव्ययीभाव समासः । स च द्विधा– नामपूर्वपदोऽव्ययपूर्व–पदश्च । नामपूर्वपदो यथा–शाकस्य मात्रा–शाकप्रति । (सप्रुप्रतिना मात्रार्थे । २।१।९ इति सूत्रेण समासः) । फलप्रति । सुखप्रति । यूपप्रति । रसप्रति । अक्षपरि । (अक्षशलाकासङ्ख्या परिणा । २।१।१० इति सूत्रेण अव्ययीभावसमासः) । शलाकापरि । त्रिपरि । चतुष्परि । तिष्ठन्ति गावो यस्मिन् काले सः–तिष्ठद्गु कालः । (तिष्ठद्गुप्रभृतीनि च । २।१।१७ इति सूत्रेण समासः) । गङ्गायाः पारं पारेगङ्गम् । (पारे मध्ये षष्ठ्या वा । २।१।१८ इति सूत्रेण निपातनादव्ययीभावः) ।

## निष्कर्षः

समासस्य महत्वं व्याकरणशास्त्रे शरीरावयवेषु मुखमिव वर्तते । कृत्तद्धितकारकसन्धिष्वपि समासस्य भूमिका महत्वपूर्णा वर्तते । यथा–कृत्प्रत्यये । कुम्भकारादौ, सन्धिषु च सुधीभिरुपास्य= सुध्युपास्य इत्यादौ, तद्धिते च शब्द एव यथा– तेषां हितः तद्धितः, मुख्य शब्दैव तथाभूतः । कारके च करोति क्रियां निर्वर्ततीति कारकः । समासे च समासजनकविग्रहवाक्यप्रधानत्वम् । एवं प्रकारेण समासघटकतया प्रवेशार्हता व्याकरणशास्त्रे दर्शनात् । अव्ययीभावसमासस्य तु न व्येतिति अव्ययः, न अव्ययमिति अनव्ययम्, अनव्ययम्, अव्ययमिव भवति सम्पद्यत इति अव्ययीभावः, इत्यात्रापि समासस्यैव भूमिका विद्यते । "तत्पुरुषः" इत्यत्रापि स चासौ पुरुषः, तम्पुरुषः, तेन पुरुष

तत्पुरुषः, इत्यादि —तत्पुरुषविग्रहवाक्यादेव सिद्ध्यति । एवं प्रकारेण “बहुव्रीहिः” इत्यत्र वहवो ब्रीहयो यस्य येन वा इति विग्रहवाक्यात् अन्यपदार्थप्रधानो वहुब्रीहिः सिद्धयति । द्वे च द्वे च इति विग्रहे द्वन्द्वशब्दस्य च निष्पद्यमानत्वादतिवैज्ञानिकी पद्धतिः सूत्रात्मकत्वात् सर्वसुलभकारित्वं विद्यत इति निष्पद्यते ।

## सन्दर्भसूची


आचार्यः, चिरञ्जीवी (वै. २०६६) समासपर्यालोचनम्, अप्रकाशिताचार्यशोधग्रन्थः, काष्ठमण्डपः, वाल्मीकिविद्यापीठम् ।

आचार्यः, रामचन्द्रः (वै। २०५३), प्रक्रियाकौमुदी, द्वितीयं संस्करणम्, वाराणसीः सम्पूर्णानन्दसंस्कृत–विश्वविद्यालयः ।

कण्डेलः, रत्नलालः, (वै. २०७७) भूषणसार–परमलघुमञ्जुषयोः समासशक्तिप्रकरणस्य तुलनात्मकमध्ययनम्, अप्रकाशिताचार्यद्वितीयखण्डस्य शोधप्रवन्धः, काष्ठमण्डपः वाल्मीकिविद्यापीठम् ।

कौण्डभट्टः (सन् १९८५), वैयाकरणभूषणसारः, वाराणसीः चौखम्बा विद्याभवन ।

दीक्षितः, भट्टोजी (सन् १९९५), वैयाकरणसिद्धान्तकौमुदी, दिल्लीः मोतिलाल बनारसीदास ।

पतञ्जलिः (सन् १९८७), महाभाष्यम्, दिल्लीः चौखब्वा संस्कृत प्रतिष्ठान ।

पाणिनिः (सन् १९९२), अष्टाध्यायी, वाराणसीः चौखम्बा सुरभारती प्रकाशन ।

बहादुरः, राधाकान्तदेवः (सन् २००२), शब्दकल्पदुमः, नईदिल्लीः राष्ट्रिय संस्कृत संस्थान ।

भट्टः, नागेशः (विक्रमसंवत् २०३९), परिभाषेन्दुशेखरः, वाराणसीः दुर्गाघाट वासुदेव बालकृष्णपटवर्धन राजराजेश्वरी प्रेस–पुस्कतकालयः ।

भर्तृहरिः, (सन् १९९७) वाक्यपदीयम्, वाराणसीः भारतीयविद्यासंस्थानम् ।

वरदराजाचार्यः (सन् १९९१), लघुसिद्धान्तकौमुदी, वाराणसीः चौखम्बा सुरभारती प्रकाशनम् ।

सुवेदी, राधाकृष्णः, (वै.२०७८) श्रीमद्भागवतस्थवेदस्तुतेः समासपरकमध्ययनम्, अप्रकाशिताचार्यद्वितीयवर्षीयशोधग्रन्थः, दाङ, विश्वविद्यालय–विद्यापीठम् ।